JOURNAL OF THE UNIVERSITY OF POONA

पुणें विद्यापीठ पत्रिका

Humanities Section

ज्ञान-खण्ड

No. 1

2 Sept 13
Copy 1954



UNIVERSITY OF POONA

1953

नीलकण्ठकविकल्पितं अधरशतकम् ।

The Adharasataka of Nilakaṇṭha

Edited by

N. A. Gore

Introduction

1. *The Manuscript Material*

So far only three Mss. of the *Adharaśataka* are known to be extant, one at Berlin, the other at Bikaner and the third at Calcutta. The text of this charming poem, which is being edited here for the first time, is based on the last two, as the Berlin Ms. or its photo-copy is still not available to me.

2. *The Description of the Mss.*

(1) The Ms. at Berlin is entitled *Oṣṭhaśataka*. It is entered in the *Catalogus Catalogorum*, Vol. I, p. 76, as follows:—

ओष्ठशतक. Kāvya by Nilakaṇṭha, W. p. 176. A reference to W. p. 176 i. e. the Catalogue of Berlin Mss. by Weber, Vol. I, 1853, p. 176, Ms. No. 586 (Chambers, 740) at once reveals, from the introductory and the concluding portions of the Ms. cited therein, that it is *identical with* the *Adharaśataka* of Nilakaṇṭha. The Berlin Ms. consists of 7 folios and contains 118 verses. According to Dr. Weber, the text is generally correct.

(2) The Ms. at Bikaner was not available to me. But a transcript of the same was kindly supplied to me by my friend Dr. B. R. Sharma, the Curator of the Anup Sanskait Library. The work contains 116 verses according to this Ms. The most important fact about this Ms. is that it was copied by one Śivānanda in 1674 A. D[1]. When it is remembered that our author Nilakaṇṭha is assigned by Prof. Gode to a period between 1610–1670 A. D., as will be shown latar on, this Ms. can be said to be almost contemporary with the author. This Ms. also is fairly correct.

(3) The Ms. at Calcutta was obtained on loan from the Asiatic Society of Bengal, through the courtesy of Prof. P. K. Gode. The Ms. bears the library No. G. 8213–76–F. 4 and is written on hand-made paper in Devanāgarī script. The hand-writing is bold, clear, and generally correct. Its size is 7·8" by 3·6". It is made up of 28 folios, with 10 lines to a page and about 31 to 32 letters to a line. Fol. 1 is fortified by pasting another sheet on to it; fol. 28 is made up of two strips of paper. On fol. 1 are written the following words:—

---

१. संवत् १७३० फाल्गुन शुक्लपंचम्यामलेखि शिवानंदेन.

मालवीयवत्सगोत्रीयराघवाचार्यस्यदौहित्र १ शुक्लनीलकंठकृत अधरस (Sic.) तक. शुक्ल-नीलकंठकृत अधरशतक २८ मालवीयरघुनाथशर्म्मणः. The Ms. begins on fol. 1 b with the five stray verses[1], given in the foot-note.

The *Śṛṅgāraśataka* of Nilakaṇṭha begins in the ninth line on fol. 1 b, and ends in the third line on fol. 13 b; and is immediately followed by the *Adharaśataka* which ends in the fourth line on fol. 23 a. This is again immediately followed by 53 Prakrit verses, mostly taken from Hāla's *Gāthāsaptaśati*. Fol. 28 b has the following words:—

म

अधरशतक

घनश्यामस्य १

Just before the beginning of the *Śṛṅgāraśataka* and the *Adharaśataka*, the words जयति जयंतीपतिर्जगति, and जयति जयतीपतिर्जम (Sic.) ति are found respectively. I request scholars to throw some light on जयंतीपतिः to whom a salutation is offered in the above words.

The *Adharaśataka*, in this Ms. contains 116 verses. It omits last two verses: शुक्लजनार्दनपुत्रः etc. and हीराभिधानपातिव्रतमहसि etc. which contain biographical details about the author and which are duly found at the end of Berlin and Bikaner Mss.

3. *The Title*

The *Adhara-śataka* belongs to the class of 'laghu kāvyas' or minor poems, handreds of which of bewildering variety are found in Sanskrit. The *Śatakas*, or Centuries of verses on a given topic form an important sub-variety of this class, of which the *Amaruśataka*, the *Caṇḍi-ś.* (of Bāṇa), the *Sūrya-ś.* (of Mayūra), the *Nīti-ś* the *Vairāgya-ś.* and *Śṛṅgāra-ś.* (of Bhartṛhari) are some of the best known specimens. The term 'Śataka' is loosely interpreted to mean, 'a hundred and a few more' for even poems

---

1. तानि प्राधि दिनानि येषु रजनी सेहे तमिस्रापदं
सृष्टिः सा विरराम यत्र भवति ज्योत्स्नामयो नातपः ।
अद्यान्यः समयस्तथाहि तिथयो यस्या मुखस्योदये
हस्ताहस्तिकया हरंति शतशो राकावराकीयशः ॥ १ ॥

गुरुमध्ये हरिणाक्षी मृद्वुटिकाभिः प्रहर्तुकामं माम् ।
दरयन्त्रितरसनाग्रं सचकितनयना निवारयांचक्रे ॥ २ ॥

कान्ते कनकजम्बीरं करे किमपि कुर्वति ।
अंगारलिखिते भानौ बिन्दुमिन्दुमुखी ददौ ॥ ३ ॥

अधरस्य मधुरिमाणं कुचकाठिन्यं दृशोस्तैक्ष्ण्यम् ।
कवितायाः परिपाकं त्वनुभवरसिको विजानाति ॥ ४ ॥

विप्रश्चन्द्रश्चन्दनश्चैकजातिर्वारी (नारी ?) वीणामन्मथश्चैकजातिः ।
अश्वः खड्गः क्षत्रियश्चैकजातिर्मूर्खः कष्ट (काष्ठं ?) गर्दभश्चैकजातिः ॥ ५ ॥

In order to present a readable text, obvious corrections have been made in these verses.

with 110 or 120 verses are styled 'Śatakas'. while the latter part (Śataka) refers to the length of the poems, the first part is usually indicative of their subject-matter, e. g. the *Sūrya-ś.*, means a century of verses in praise of the Sun. Works like (1) the *Amaru-ś.*, (2) the *Mālini-ś.*, the *Śikhariṇi-ś*, (3) the *Devyāryā-ś*, the *Rāmāryā-ś*, (4) the *Śrīśa-yamaka-ś*. show that in the titles a reference is sometimes made to the (1) author, (2) the metre, (3) the subject-matter and the metre, and (4) the subject-matter and a figure of speech. There are about 150 Śatakas in Sanskrit, the majarity of them being still unpublished, as can be seen from the Index to the *Classical Sanskrit Literatare* by Dr. M. Krishnamachariar. When the *New Catalogous Catalogorum* is published many more indeed would be found to be in existence.'

The *Adhara-śataka* means 'a century (actually there are 118 vv.) of verses in praise of the surpassing beauty of the Lower Lip of a lovely maiden.'

4. *The Poem*

As pointed out above, the poem consists of 118 verses, of which 112 (12-113) are actually devoted to the description of excellent charms of the Lower Lip. Each verse is complete in itself. In v. 11, Nīlakaṇtha states the occasion which inspired the pome—he was carried away on the wave beauty of a certain maiden, but he somehow managed to describe the charms of her exquisite lower lip. Nobody can charge him with having wasted his wit in writing about a mere trifle like the *adhara*, for in a thing of beauty resides the lusture of the Lord, in a great measure (V. 114). This is reminiscent of—

यद्यद्विभूतिमत् सत्त्वं **श्रीमद्** ऊर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥ *Gītā* 10, 41.

V. 1–Invocation to the *Adhara* to instil sweetness in the words of the author. V. 2–Invocation to Gaṇapati. V. 3 – Praise of the creations of the Creator and the good poets, VV. 4–10 — He who raves without knowing the real meaning (*rahasya*) of a poem is no better than a beast, however learned he may be. A mere scholar proficient in logic (*tarka*) is incapable of knowing the charms of poetry. A truly appreciative person (*rasika*) alone is able to enjoy the beauties of literature.

After these introductory remarks, he goes on to sing the praises of the *adhara*, emphasising its inviting red tinge, sweetness and delicacy. He establishes, in a poetically convincing manner, the superiority of the *adhara* to several objects in nature, to which it is usually compared by other poets, viz. [In point of redness—] the sprouts (*pallava* and *kisalaya*, 28, 40, 48, 73, 78); Bimba fruit (39, 40, 78, 110); Bandhūka flower (40, 73, 78); Pomegranate flower (*dāḍima*, *karaka*, 40, 78); red lotus petal (40); coral (*pravāla*, 37, 78, *vidruma*, 40, 73,); Japâ flower (40, 78); mango tree (41: अहह रसाल वृथा तवावतारः ।); Ruby (73); [In point of sweetness–] nectar

(*amṛta*, 31, 36, 75, 104, 106, *sudhā*, 21, 22, 29, 30, 78, 17); grapes (*drākṣā*, 22, 78); honey (*madhu*, 78); Sugar-cane (96); [In point of delicacy–] Sirīṣa flower (91); the digit of the moon tinged red in the evening (78).

The *adhara* combines in itself the sweetness of nectar and the delicacy of Sirīṣa and hence is superior to both (19). Nectar can hope to equal the *adhara* if it has the sweetness of *adhara* itself, possesses the lovely red lustre of sprouts and is acceptable to the eyes of the poet (89) but that too excluding the time of *Surata* (90). Amṛta cannot exist in the Moon, who suffers from wanning and destroyes the lovers in separation. It indeed resides in the *adhara*, which revives the god of love (31). With a pun on *rāga* meaning (1) redness and (2) love, it is pointed out that the Moon full of darkness in his heart (a reference to the Spot on the Moon) and the lord of the dark night cannot possibly be the friend of Cupid. But the moon in the form of a lady's face full of *rāga* under the pretext of the *adhara* is his (Cupid's) true friend. The snake in the form of Cupid (*māra-phaṇi*) resides on the *adhara* of a lady; that is why the pecock (*phaṇi-bhuk*) in the form of the tresses of her hair lives on her head (24). Or the *adhara* can be said to be the gem in the hood of the snake in the form of Cupid, for it removes poison from the body of a youth bitten by the Cupid snake (66).

Extra-ordinary things are caused by the *adhara*. The *adhara* is the day-lotus (*padma*) before which the Moon himself fades whereas the ordinary day-lotus fades before the moon (67). Ordinarily shade (*chāyā*) is cooling, but by sitting under the shade of the *adhara*, the poet's mind gets very much heated, i. e. its lustre, *chāyā*, excites his mind, 100). The *adhara* steals his heart; but perverted in the law of King Cupid who punishes him, the owner, instead of the thief (10)! A man about to be drowned cannot hope to rise up i. e. to be saved by catching hold of the lower wave (*adhara-taraṅga*), but the poet's mind about to be drowned in the Ocean of a lady's beauty, hopes to rise up by resorting to the wave in the form of her *adhara* (105). When the fire of separation is blazing all round, think of the *adhara* and the world will appear to be full of tender and cool leaves (108)! Such is the wonderful power of *adhara*. A brahmin (*dvija*) committing sin (*kṣati*) cannot obtain religious merit, but a *dvija* (a tooth) performing *kṣati* (biting the *adhara*) secures the merit described in the Purāṇas (99)!

With the help of *adhara* which is a gem (*maṇi*) producing the miraculous power of aṇimā (assuming an atomic size), Cupid enters the hearts of Yogins, difficult of access (43)[1]. The *adhara* alone is the auspicious gem in the world; other gems are held to be similarly auspicious, simply because they resemble it (92). As the *adhara*, the real gem, was not among the gems discovered, the churning of the ocean by the gods and demons was really in vain (44).

1 cf. अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः ।

The *adhara* is like seasoned wine (80) and blessed is he who tastes it or rather, blessed are his penances which yield such fruit to him (55). Even the trees perform penance to get sprouts resembling the *adhara* (76).

The goddess Sarasvatī resides inside the mouth of a beautiful lady; her speech is her invisible lute (*Viṇā*). This can be inferred from the *adhara* which is the bow (*koṇa*) which plays on its strings, and is consequently marked by lines (59). The *adhara* may be said to be Aruna, or even Viṣnu (112).

The Creator created the *adhara* after practising severe penance, as is evident from his love for *padmāsana*, (1, lotus used as a seat, 2, a yogic posture) (65). In fact, he became qualified to create it after special preparation: he sat on a seat of *red* coral, was consecrated with the *red* water of the Sarasvatī and propitiated the *red-coloured* goddess Tripurā with the *red* Japā flowers (65). Having created it he was so much enamoured of it himself that even when possessed of enough material (*prāpta-prakāra ?*) he does not create another thing like it (50). Noticing that his concentration (*samādhi*) was disturbed by it, he got angry with it and called it *adhara* (1, low, mean, vile; 2, the lower lip.); or the name was given to deceive people, for he was himself attracted by its excellence when he saw it after creating it (95) !

The *adhara* cannot be compared to Poetry; it is far superior to it (58), for by tasting it the poets are inspired to write poetry (39). As a matter of fact, the redness of the *adhara* is indescribable (34); *adhara* is simply incomparable (53 74) and unrivalled (61). For having vanqnished (surpassed) all the objects to which it might have been compared, the *adhara* is greeted with a shower of flowers in the form of smiles (113).

He who is eminent both as a critic and a poet alone will be able to enjoy this work, says Nīlakaṇṭha (115) and prays that That Lustre through whose favour it was completed may be pleased with it (116). The last two verses contain biographical details (117-118).

5. *Style and Metre*

A perusal even of the above sketch of the contents of the poem will show the great power of imagination and expression of the poet in writing so much in a striking way about such a small, restricted subject. He uses many figures of speech such as Śleṣa, Rūpaka and Dṛṣṭānta. He has given poetical etyemologies of *raktaka* (17), *amṛta* (57), *karaka* (69) and refers to two Sūtras of Pāṇini viz. संज्ञायां कन् (V. 3·57) and हलङ्यांभ्यो etc. (VI 1·68) respectively in वदन्ति संज्ञा-कनमत्र मन्दाः and सोरिव लोपस्तदन्तस्य (17 and 25). There appears to be a reference to the *Manusmṛti* 4·37 (नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन) in अस्तोदयाद्रिशिखरोपरि रज्यतो यन्नालोकनं दिनकृतः शुभकृद्वदन्ति । (15 b), and to *Manu*. 5·130 (नित्यमास्यं शुचि स्त्रीणां) in स्त्रीमुखमेते सदा शुचि प्रोचुः । (83 d). It is quite possible that the references are to corresponding passages in other Dharmaśastra texts. All this shows the skill of our poet to press into service even provisions of Vyākarana and Smṛti to score a point in poetry.

The following words deserve notice :— यावकमृगशःवदृश् (25), नारङ्ग (35) तमीश (the moon, 26), नाहकार 'no' (40, 78), विरञ्चिः (usually विरिञ्चिः, 56), रक्ताश्मन् (64), ताम्रचूर्ण (70), लपन (mouth, 80), त्रिजगत् (usually त्रिजगती, 85, 102) सानु (102, a stone ?), जटित (103), and दु खाकरोति (107).

The following five referances to the *Nose-ornament* should be noted :

नासाभूषा (12), नासाभूषण (107), नासामुक्ताफल (40), नासासितमणि (68), and नासाभूषणपद्मराग (94). The last three references show that a pearl, an emerald and a ruby were used in the nose-ornaments.

Nilakaṇtha has used 16 metres in the 118 vv., and he has shown his preference for the उपगीति and the आर्या, they being used in 22 and 17 vv. respectively. His *Cimanīcarita* has been written almost entirely in the मन्दाक्रान्ता metre.

6. *The Author, his Works and his Date.*[1]

Unlike many other authors, Nīlakaṇtha has mentioned at the end of each of his works (1) his own name, (2) the names of his parents, (3) the name of his maternal grand-father, (4) the name of his teacher, and (5) the date of its composition (except in the case of the *Adhara-śataka*).

These details show that he was the son of Hīrā and Śukla Janārdana. Śukla seems to be Nīlakaṇtha's family name or surname. He was the grandson on his mother's side of one Vatsācārya. The Tanjore Ms. of the *Śṛṅgāraśataka*[2] reads Vāñchārya instead of Vatsācārya, and Professor P. P. S. Sastri, the editor of the Descriptive Catalogue suggests on p. XL of the Preface that the Vāñchācārya referred to is the same as Vāñcheśvara, the author of the *Mahiṣaśataka*, contemporary of Pratāpasiṁha Mahārāja (A. D. 1741-64). This identification of Vāñchācārya in v. 108 of the *Śṛṅgāraśataka* with the author of the *Mahiṣaśataka* is untenable for two reasons, viz. (1) all other Mss. of Nīlakaṇtha's works read Vatsācārya instead of Vāñchācārya, and (2) the date of Nīlakaṇtha, as will be shown

1. For information about our author, his works and date, I am deeply indebeted to the following three papers of Prof. P. K. Gode :—

(i) A note correctly interpreting the chronogram at the end of two MSS of the *Cimanīcarita*, published in the *Annals* of the Bhandarkar Oriental Research Institute, Poona, Vol. X pp 331-332.

(ii) The Historial Backgroud of the *Cimanīcarita*, a romantic love-poem by a pupil of Bhaṭṭoji Dīkṣita, dealing with the love of the daughter-in-law of Allāh Vardī Khān Turkmān (Between 1606-1659) published in the *Poona Orientalist*, Vol. VI (1941), and

(iii) Nīlakaṇṭh Śukla, a Romantic and pugnacious pupil of Bhaṭṭoji Dīkṣita and his works –between A. D. 1610 and 1670, published in the *New Indian Antiquary*, Vol. V, (1942), pp. 177-183.

2. A Des. Cat. of SK. MSS. in the Tanjore Mahārājā Serfoji's Sarasvatī Mahal Library, Tanjore, Vol. VII, MS. No. 3966.

below, from his own statements, is earlier by about a century than that of Vāṛcheśvara the author of the *Mahiṣaśataka*[1]. Prof. Sastri was led into this error by the defective chronogram at the end of the Tanjore Ms. which he interpreted to mean 1765 A. D. On fol. 1a of the Calcutta Ms of the *Śṛṅgāraśataka* and the *Adharaśataka* we read the following words

मालवीय वत्सगोत्रीय राघवाचार्यस्य दौहित्र शुक्लनीलकण्ठकृत अधरस (sic) तक

शुक्लनीलकण्ठकृ अधरशतक मालवीय रघुनाथ शर्म्मणः ।

It would appear from this that वत्साचार्य is an abbreviation for मालवीय-वत्सगोत्रीयराघवाचार्य, and that the words मालवीयरघुनाथशर्म्मणः point out to the owner of the Ms. If this endorsement on the Calcutta Ms. has any basis in fact, it would give us some new information about Nilakantha's maternal grand-father and also show that the Calcutta Ms. belonged to the maternal grand father's family of Nilakantha. Without being dogmatic about the value of the above endorsement, I would like to invite the attention of scholars to it for further examination. Nilakantha was the pupil of Bhattoji Dikṣita (1550-1620 A. D.) in grammar and of Bhatta Mandana in rhetoric.

From the fact that Nilakantha dedicated some of his works to Lord Śiva on the Śivarātri-day (शिवरात्रौ शिवपदयोर्निजकृतिराधायि नीलकण्ठेन) he appears to be a great devotee of Śiva.

Works:—Nilakantha has written four short poems and one work on grammar viz. (1) the *Śṛṅgāraśataka*[1] in 116 verses. It was composed in 1631 A. D.. (2) the *Śabdaśobhā*, a small work on grammar, written in 1637 A. D., (3) the *Cimanicarita*[2] in 106 verses, describing the romantic love between Dayādevaśarman, a Brahmin teacher and Cimanī, the daughter-in-law of Allāhavardikhan. It was composed in 1656 A. D; (4) the *Jārajātaśataka* in 110 verses. From the first two verses quoted by Weber in the Descriptive Catalogue, it appears to be written to refute the charge of plagiarism levelled against Nilakantha and to denounce those who plagiarise the words and ideas of other poets. Dr. Weber has suggested from a study of its defective chronogram at the end that it was composed in 1661 A.D., (5) the present work, the *Adharaśataka* in 118 verses. As stated above there is no chronogram at the end of any of the three extant Mss. of this poem.

Date:—From the dates of composition of the four out of his five works, ranging from 1631 to 1661 A. D. we shall not be far wrong if we assign Nilakantha to the period 1610–1670 A. D. as is done by Prof. Gode.

---

1. I have edited this work from the two extent MSS. and it is expected to be published very shortly.

2. I have published a critical edition of this work from the four extent MSS. in the *Journal of Oriental Studies*, Vol. I (1950), No. 1. A few offprints are still available from the editor.

The *Sabhyālaṅkaraṇa*[1], a valuable anthology compiled by Govindajit[2] who is assigned to the latter half of the 17th century A. D., quotes 36 verses, from the *Śṛṅgāraśataka*, 8 from the *Adharaśataka* and, 1 from the *Cimaniaarita*[3]. VV. 1, 27, 40, 41, 58, 59, 60 and 90 in the *Adharaśataka* occur in the *Sabhyālaṅkaraṇa* respectively as nos. 95, 96, 90, 97, 105, 103, 107 and 98. Out of these vv. 59 and 60 are not quoted as of Nilakaṇṭha and have been traced by me for the first time, the rest are quoted as of नीलकण्ठशुक्लानाम. The reference to Nilakaṇṭha in the plural *honoris causa* and citation of 45 verses from three of his works by a contemporary author show that Nilakaṇṭha was highly respected by his contemporaries and his works become quite popular soon after they were written, a rare distination, indeed!

---

1. Edited by Dr. J. B. Chaudhuri, Calcutta, 1947.

2. These will be mentioned in detail in the Introduction to my forthcoming edition of the *Śṛṅgāraśataka*.

3. V. 99 = *Sabhyā*.- V. 482 with the remark चीमनीशतकात्. This would mean that though this title is unknown to four extent Mss. of the चिमनीचरित and the author himself calls his work चिमनीचरित in V. 102 (चिमनीचरिते रसाश्रयं etc.) it was popularly known as चीमनीशतक among Nilakaṇṭha's contemporaries, as it consists of 106 VV. only.

नीलकण्ठकविकल्पितं अधरशतकम

वदनकमलमुद्यन्मन्दहासप्रचारं
विरचयति निकारं यत्प्रसादात् सुधांशोः ।
तदिदमधरबिम्बं जीवनं मीनकेतो-
र्मम वचसि विधत्तां धुर्यमाधुर्यधाराम् ॥ १ ॥

गिरिशमृगदृशो यच्चुम्बनादेव मन्ये
दशनवसनमासीद् बन्धुजीवकवैरम् ।
गणपतिवदनं तत् सक्तसिन्दूरकान्तं
वितरतु दुरितान्तं भ्रान्तिशान्तिं तथा नः ॥ २ ॥

अनवरतजायमाना निरवधिरितरेतरं भिन्ना ।
जयति विरञ्चे रचना वचनाली सत्कवीनां च ॥ ३ ॥

अज्ञात्वा कवितायाः किमपि रहस्यं वृथैव यो भणति ।
तस्मै पण्डितपशवे शिव शिव दूरान्नमस्कुर्मः ॥ ४ ॥

कर्कशतर्कविचारव्यग्रः किं वेत्ति काव्यहृदयानि ।
ग्राम्य इव कृषिविलग्नश्चञ्चलनयनावचोरहस्यानि ॥ ५ ॥

यद्वाऽञ्जलि विदुषोऽहं प्रणतो वः शिष्य एषोऽस्मि ।
मा कुरुत मम पुरस्तात् कवित्ववैदग्ध्यपाण्डित्यम् ॥ ६ ॥

गर्जन्तो जडरूपाः केचन घनवन्नयन्त्यधो जगतीम् ।
उन्नमयन्ति नतामपि केऽपि पुनः कपटकोल इव ॥ ७ ॥

मधुकरवन्मधुरगिरः सुमनःसंगेन केऽपि मोदन्ते ।
केऽपि पुनर्विरहिण इव वह्नीनिव तमपि कलयन्ति ॥ ८ ॥

वैदग्धिगुणाञ्चितमानसमन्थेनोन्माथिताद् विबुधाः ।
सारस्वतसागरतः सूक्तिसुधा संततं सुलभा ॥ ९ ॥

क्लिश्यन्तु नाम शतशः सुलभा सूक्तिः परंतु रसिकानाम् ।
मन्थे तथाहि सिन्धोः सुरैः सुधासादि नाहितैस्तेषाम् ॥ १० ॥

1. B. विदुषो वः प्रणतोऽहं शिष्य°.
2. B. omits this stanza.

कस्याश्चिन्नयनयोः लावण्यमकल्लोलनीयमानमेनाः[1] ।
विरचयति नीलकण्ठो बिम्बाधरवर्णनं तदपि ॥ ११ ॥

जल्पन्त्यभ्यस्तनन्दिप्रभृतिविरचितग्रन्थतत्त्वाः कवीन्द्राः
भिन्नामङ्गेषु तङ्गस्थितिमनुदिवसं सुभ्रुवोऽस्मन्मते तु ।
बिम्बोष्ठे पक्ष्मलाक्ष्या रतिपतिवसुधाधीश्वरो नित्यमास्ते
नासाभूषापदेशाद् विलसति यदिदं छत्रमस्योपरिष्टात् ॥ १२ ॥

नासामौक्तिकवेषो धयति यदोष्ठं मृगीदृशः शुक्रः ।
युक्तं भजति तदेनं त्रैलोक्ये कविरिति ख्यातिः ॥ १३ ॥

अरविन्दलोचनाया जयतो रदवाससी रतिस्मरयोः ।
अन्योन्यरागवलिते मिलिते इव जीविते मूर्ते ॥ १४ ॥

भवभालानलदग्धः स्मितसुधया जीवितस्त्वया सुतनु ।
मन्येऽधरयुगदम्भाद् विपत्रितः पञ्चबाणतरुः ॥ १५ ॥

लावण्यामृतसागरे मृगदृशो वक्त्रेऽधरच्छद्मना
स्रोतःसंगममादधाति सततं सारस्वतं मन्महे ।
एतत्पानकृतो यतः कृतधियः स्वान्ते समुज्जृम्भते
बोधः प्रौढकवित्वमोदितजगत्प्रख्यातकीर्तिप्रदः ॥ १६ ॥

कान्तोष्ठकान्तेः पुरतोऽल्परक्तान्येतस्य पुष्पाणि भवन्ति नूनम् ।
तत्त्वोपचारादिव रक्तकोसौऽवदन्ति संज्ञाकनमत्र मन्दाः ॥ १७ ॥

बन्धूकलक्ष्मीः कमलेक्षणाया दन्तच्छदेनापहृतेति मन्ये ।
समस्तपुष्पान्वयवन्दिनो यत् तथालिनो नान्तिकमस्य यान्ति ॥ १८ ॥

दानैकशालिनि विशालविलोचनाया
दन्तच्छदे स्फुरति नूनमनुत्तमा श्रीः ।
अस्य द्विजाः परिचयं रचयन्ति यस्मात्
कुन्दावमाननविधिप्रथिताभिमानाः ॥ १९ ॥

निःसारमेवाधरपल्लवेन
यत् पक्वबिम्बं बहुधा व्यधायि ।
हे तन्वि हेतोरत एव जाने
शाकोपकारादपि हीयते तत् ॥ २० ॥

---

1. B. कल्लोलनीयमानायाः
2. B. नूनमनश्वरा.

सुरतरुसहजन्मताकृतं य
त्रिपुणजनेषु सुधायशोऽवशिष्टम् ।
तदपि न सहतेऽधरः प्रियाया
दिशति यदेष मनःस्थितोऽपि कामम् ॥ २१ ॥

सुधा मुधैव प्रतिभाति चित्ते
क्षीरं च नीरं खलु यत्पुरस्तात् ।
तस्याधरस्यायतलोचनाया
द्राक्षा सदक्षेति कथं वदामः ॥ २२ ॥

बिम्बुभ्यन्ती सुभ्रूदशनवसनश्रीविलसिते
पुरश्चर्यां मन्ये विरचयति बन्धूकलतिका ।
न चेदेवं कस्मात् कुसुममिषतो लोचनतति
स्तदीया मध्यान्हावधि मुकुलतामेत्यनुदिनम् ॥ २३ ॥

विकसत्सरोजदलदीर्घदृशो
दशनच्छदे वसति मारफणी ।
इति चेदलीकमलकोपधितः
फणिभुक् कुतस्तदुपरि स्फुरति ॥ २४ ॥

यावकमृगशावदृशः सुरुचो रदवाससो योगात् ।
तव भवति मद्विचारे सोरिव लोपस्तदन्तस्य ॥ २५ ॥

आस्यं विकस्वरसरोरुहसोदराक्ष्या
मित्रं प्रसूनधनुषो न तुषाररश्मिः ।
ओष्ठोपधेर्यदिदमन्तरुपात्तरागं
संलक्ष्यते हृदि महामलिनस्तमीशः ॥ २६ ॥

मुखकोकनदे मदालसाया मकरन्दोऽधरवेष एष मन्ये ।
चटुलो युवचित्तचञ्चरीकोऽचलतामञ्चति येन तत्र चञ्चन् ॥ २७ ॥

जानीमः स्मितकीर्तिसूचितजयादम्भोजनेत्राधरात्
भीतैरेव पलाय्य पल्लवभरैः शाखाः श्रिताः शाखिनाम् ।
नो चेत् तान् परितः स्फुरन्ति सुमनःसौरभ्यलोभभ्रम-
न्मैलिन्दावलिकैतवेन कलिताः कस्मादकीर्तिच्छटाः ॥ २८ ॥

---

1. B. मद्विचारे लोपः सुप्रत्ययस्यैव.
2. B. ० रुपात्तसंगं.
3. B. एव.
4. B. भीतैरेव पलाय्य पल्लवततिः शाखाश्रिता शाखिनाम्
5. B. तां परितः

प्रफुल्लपङ्केरुहलोचनाया दन्तच्छदस्वादमुदीरयेत् कः ।
यस्य प्रसादात् कविता कवीनां सुधारसद्रोहमुरीकरोति ॥ २९ ॥

यत्सङ्गतो वचनमञ्जितलोचनाया
निन्दां सुधाविषयिणीं प्रकटीकरोति ।
तस्याधरस्य तुलनां सुधया वदन्तो
विदन्ति मन्दमतयो बत विभ्रमाद्यम् ॥ ३० ॥

जीवातुरत्ययजुषोऽप्यमृतं तदाहु-
रिन्दौ क्षयिण्यपि वियोगिविनाशकेऽपि ।
अस्मन्मते स्फुरितभासि सति क्षतेऽपि
कान्ताधरे स्फुरति जीवितकामदेवे ॥ ३१ ॥

नामाक्षराणि दशनक्षतैकैतवेन
येनेह पुष्पधनुषो विलसन्ति तन्वि ।
तस्मादुदेति मनसीति मतिर्ममैतद्
बन्धूकपुष्पमधरभ्रममातनोति ॥ ३२ ॥

नितान्तरक्तानि मनांसि यूनामङ्गेषु सर्वेष्वपि सारसाक्ष्याः ।
रदच्छदे तन्मयतामभीषां तथापि रागः प्रकटीकरोति ॥ ३३ ॥

सक्तं कृष्णेन रक्तं भवति मुनिमनस्तेन संयोगभाजो-
रप्यक्ष्णोरध्वनापि क्षणमपि मिलनं यत्र दैवादवाप्ते ।
कौसुम्भोद्दामदम्भोद्दलनपटुतरप्रौढिमा शोणिमासौ
बिम्बोष्ठस्य प्रियायाः कथमिव विषयं यातु वाग्देवतायाः ॥ ३४ ।

ओष्ठद्वयीमधुमदारुणितास्यकान्ति-
स्तृष्णां तनोति मदनातपतापभाजाम् ।
पात्रेऽरुणाश्मरचितेऽस्य रुचानुषक्ता
नारङ्गखण्डयुगलीव विनीतवल्का ॥ ३५ ॥

अमृतादधरोऽतिरिच्यते चतुरैरेतदतर्कि नानृतम् ।
स्मृतिरेव यदस्य जीवयत्यतनुं त्र्यम्बकरोषनाशितम् ॥ ३६ ॥

त्रासः प्रवालस्य भवत्यभीक्ष्णं
मृगाक्षि मन्ये दशनच्छदात् ते ।
नो चेत् कथं नाम दिने दिनेऽसौ
सौन्दर्यमुज्झन्नपकर्षमेति ॥ ३७ ॥

1. B. दशनक्षतिकैतवेन.
2. B. पुष्पविशिखस्य लसन्ति.
3. B. ० तास्यकान्तेस्तृष्णां

दशनवसनमेतद् दाडिमस्य प्रसून-
श्रियमहरदिदं ते दन्तपङ्क्त्यर्पयन्ति ।
परिणतफलबीजश्रेणिशोभां तदीयां
स्मितमुखि हरतीयं संगमिष्यै यदस्य ॥ ३८ ॥

सपदि हरति बुद्धिं बिम्बमास्वाद्यमानं
भवति बत मुनीनामेष मिथ्याभिलाषः ।
दशनवसनबिम्बास्वादतो यन्मृगाक्ष्या
परिणमति कवित्वे कापि बुद्धिः कवीनाम् ॥ ३९ ॥

न बन्धूकं नो वा करककुसुमं नो किसलयं
न बिम्बं नाम्भोजं दलमपि न वा विद्रुमजपे ।
इदं नासामुक्ताफलमधरसाम्याय सुदृशः
किमित्थं नाकारं विरचयति दोलायितमिषात् ॥ ४० ॥

किसलयफलमञ्जरीर्जयन्ति
द्युतिरससीत्कृतिसौरभाणि यस्य ।
विलसति दयितारदच्छदेऽस्मि-
न्नहह रसाल वृथा तवावतारः ॥ ४१ ॥

आसक्तानि यदस्मिन् युवजनचेतांसि रक्तानि ।
एत एव तन्वि मन्ये रदवसनं रक्तमाभाति ॥ ४२ ॥

कमलदलदृशोऽधरस्य दम्भा—
दणिमविभूतिकरो मणिर्विभाति ।
रतिपतिरधिगम्य यत् तमेव
प्रविशति योगिमनःसु दुर्गमेषु ॥ ४३ ॥

रत्नैकलाभाय सुरासुराणां
वृथैव पाथोनिधिमन्थयत्नः ।
न यत्र लब्धो दशनच्छदोऽस्याः
समस्तरत्नद्युतिनिर्जितश्रीः ॥ ४४ ॥

मत्पल्लवानां तुलनां वदन्ति
दन्तच्छदेनाम्बुजलोचनायाः ।
इति प्रमोदेन मधौ रसालः
प्रफुल्लतामेति ममेति बुद्धिः ॥ ४५ ॥

1. B. शक्तिः.
2. B. omits this stanza.
3. B. रदनच्छदोऽस्याः,
4. B. रदच्छदेनाम्बुज°

अर्चयति स्मितकुसुमैरधरदलं मङ्गलं सुतनोः ।
अत एव मुखसुधाकरमण्डलमिदमक्षतं वसुभिः ॥ ४६ ॥

त्वद्धरबिम्बाद् भीतिं मधुरिमसमये रसालफलमेति ।
नोचेत् तदैव दयिते कथमिदमतिपाण्डुतामयते ॥ ४७ ॥

प्रातः पल्लवपङ्क्तिर्हिमसीकरकैतवान्मन्ये ।
रोदिति रदच्छदेन स्मितमुखि सुतरां पराभूता ॥ ४८ ॥

आतङ्ककृद् विद्रुमवीथिकासु कोकोपकारी द्विजसेव्यमानः ।
सुमेरुशृङ्गस्तनि तावकीनो दन्तच्छदोऽसावरुणो विभाति ॥ ४९ ॥

विधाय बिम्बाधरमायताक्ष्यास्तत्रैव चित्तं रमते विधातुः ।
प्राप्तप्रकारोऽपि यदेष विद्वान् न तादृशं वस्तु पुनः करोति ॥ ५० ॥

रक्तं किमित्यमृत दैवतसेवनेऽसि
दुग्धोदधिं त्वमपि विद्रुम सेवसे किम् ।
मन्ये मुधैव युवयोः स्पृहणीयमास्ते
सादृश्यमेव सुदृशो रदनच्छदस्य ॥ ५१ ॥

अस्तोदयाद्रिशिखरोपरिरज्यतो य-
दालोकनं दिनकृतः शुभकृद् वदन्ति ।
कान्तेऽस्य तावकरदच्छदरागकान्ति-
स्पर्द्धाफलं परिणतं तदिति प्रतीमः ॥ ५२ ॥

यदुपरचितचित्ताशेषवृत्तेर्ममान्त-
र्भुवनमपि समस्तं तन्मयं यच्चकास्ति ।
अवितथमतिविज्ञाः काव्यबन्धे तदेनं
निरुपममधरं ते कुन्ददन्ति ब्रुवन्ति ॥ ५३ ॥

सुधाभानोर्भानून् अनवरतमास्वादितवतां
चकोराणां चेतः स्पृहयति बताङ्गारशकलान् ।
अपास्यन्नेते चेत् सुदति तव दन्तच्छददलं
तदाधास्यन् मन्ये क्वचिदपि ततोऽन्यत्र न मनः ॥ ५४ ॥

सीत्कारसंभावितमोष्ठबिम्बं
चुम्बत्यहो यश्चपलेक्षणायाः ।
धन्यः स किं तस्य तपांसि किं वा
धन्यानि तादृक्फलदानि तस्य ॥ ५५ ॥

---

1. B. सुमेरुतुङ्गस्तनि.

सरस्वतीनीरकृताभिषेकः
प्रवालपीठोपरिराजमानः ।
मन्ये जपाभिस्त्रिपुरामुपास्य
प्रियाधरं कल्पितवान विरञ्चिः ॥ ५६ ॥

बिम्बाधरं वीक्ष्य विलासवत्या
मृतं न तस्मादमृतं मतं नः ।
नैनेन पीनेन मृतिस्तदेषा
युक्ता निरुक्तिर्न पुरातनोक्ता ॥ ५७ ॥

न यत्रालंकारो रचयति रुचिं यस्य न रसे
परिच्छेदो यस्मिन् विलसति समस्तेऽतिमृदुता ।
यं उत्कर्षं धत्ते कमपि रचिते खण्डनविधौ
कथं ब्रूमः काव्योपममधरमेनं मृगदृशः ॥ ५८ ॥

गिरां देव्या मन्ये वरतनुमुखान्तःस्थितिजुषो
वचोव्याजाद् वीणा क्वणति मनुजागोचररुचिः ।
यतस्तस्यास्तन्त्रीक्षतिजनितरेखापरिचितो
ऽधरच्छद्मा कोणः परिलसति माणिक्यघटितः ॥ ५९ ॥

माधुर्यमेतादृशमाप्तुकामा रसे निजे दाडिमबीजराजिः ।
दन्तावलिव्याजत एतदीयं दन्तच्छदं सेवत इत्यवैमि ॥ ६० ॥

आदर्शमुख्या जगतीतलेऽस्मिन्
स्वच्छाः पदार्था यदि नो भवेयुः ।
तत्संमुखे वा न भवेदयं चेत्
तदाधरोऽस्याः खलु निःसपत्नः ॥ ६१ ॥

जन्म त्वमुखपद्मात् पद्मभुवो भावि तदिदमस्माकम ।
वदति रदच्छददम्भी सुदति तदीयः प्रभाङ्कुरोद्भेदः ॥ ६२ ॥

मुखमधरद्युतिमधुरं तरुणि तवेदं तनोतिः नः स्फूर्तिम ।
दिनकरकिरणकरम्बितमम्बुजमुषसि प्रफुल्लमिव ॥ ६३ ॥

1. B. विधाता.
2. B. यदुत्कर्षं.
3. B. ०मधरबिम्बं मृग०
4. B. वचोदम्भाद्.
5. B ०क्षतजनित०
6. C. तदीयप्रभाङ्कुरोद्भेदः

अवगतमतिशयसीमा दशनच्छदशोणिमा सुदृशः ।
रक्ताश्मन्यपि यस्य व्यक्ता लसति प्रतिच्छाया ॥ ६४ ॥

त्वदधरविधये विधिना विहितमनल्पं तपो नूनम् ।
वदतीदमेतदीयो विधुमुखि पद्मासनप्रणयः ॥ ६५ ॥

अधरः सुमुखि भवत्याः शिरोमणिः कामकुण्डलिनः ।
अस्माद् विषापहरणं यूनो मदनेन दष्टस्य ॥ ६६ ॥

अरुणकिरणशाली मानसोल्लासहेतुः
स्फुरितपरमहंसासक्तिरासक्तलक्ष्मीः ।
कुसुमविशिखबाणः पद्ममेवाधरोऽसा-
वमृतरुचिरमुष्मान्म्लायतीदं विचित्रम् ॥ ६७ ॥

नूनं मदनगणेशस्तदधरवेषस्तदेतदुपरिस्थम् ।
नासासितमणिदीप्तेर्दम्भाद् दूर्वादलं स्फुरति ॥ ६८ ॥

करकं करोति भीत्या रदनच्छदसाम्यसंकल्पम् ।
एतत् तदीयनाम्नो वक्ति निरुक्तिः करे कमस्येति ॥ ६९ ॥

इह युवहृदयानां खेलतां भाति मध्ये
दशनवसनदीप्तेर्दम्भतस्ताम्रचूर्णम् ।
स्फुरितरुचिरवेणीव्याजरोलम्बषङ्क्तौ
कुसुमसमयमस्यामागतं तत्प्रतीमः ॥ ७० ॥

मोहे हेममयं विभाति भुवनं वाणादिभिः प्राक्तनै-
रुक्तं सत्कविभिस्तदेतदधुना मिथ्यैव मां भासते ।
नो चेत् स्मेरमुखीरदच्छदरुचिस्मृत्या समासादयन्
मोहं मौक्तिकयुक्तविद्रुममयं पश्यामि विश्वं कुतः ॥ ७१ ॥

रक्तोऽधरः कीदृगहं न जाने प्रिये यदस्मिन् परिपीयमाने ।
यथा यथा यावकरागनाशस्तथा तथा रक्तरुचिप्रकाशः ॥ ७२ ॥

न पद्मरागोऽपि न पल्लवोऽपि न विद्रुमोऽपि श्रयते पुमर्थम् ।
प्रिये तमेनं पुरतोऽधरस्य श्रयेत बन्धूकमिदं कथं तत् ॥ ७३ ॥

कोऽपि रसः कापि रुचिः कोमलता कापि राजते यस्मिन् ।
सुमुखि तवाधरमेनं निरुपमभावः समेति किं चित्रम् ॥ ७४ ॥

अधरस्पर्धासमये केवलमियमेव मे शरणम् ।
इत्याकलय्य कलयति कमलमुखि क्लीबतामृतम् ॥ ७५ ॥

वसनिरनावृतदेशे जलमेकं जीविकेत्यतो जाने ।
सेदति त्वदधरकिसलयसाम्यकृते कुर्वते तपस्तरवः ॥ ७६ ॥

सन्ध्यारागानुरक्तामृतनिधिकलामात्मयोनिर्गृहीत्वा
स्मेरं बिम्बाधरं ते विधुमुखि विदधन् नूनमेतज्जगाद ।
एषा चान्द्री कलाद्य स्फुरति शिवशिरस्येतदामीत् प्रसिद्धं
तस्मिंस्तत्त्वानभिज्ञो वदति वत जनो मूर्ध्नि तामन्धकारे: ॥ ७७ ॥

बन्धूकं करकं जपा किसलयं बिम्बं प्रवालः सुधा
द्राक्षाम्रं मधु सान्ध्यरक्तिमसमासक्ता सुधांशोः कला ।
तद्बिम्बाधरसाम्यमार्गणजुषामेते पदार्थाः पुरः
स्फूर्जन्तः कलयन्ति केवलमहो नाक्कारमेव द्रुतम ॥ ७८ ।

अधरदलं मतिमद्भिर्निर्णीतं पल्लवत्वेन ।
पश्यत परिणमतीदं पूर्वतपस्याफलत्वेन ॥ ७९ ॥

रागं तनोति तनुते मोहं स्वादुश्च रक्तश्च ।
चषकोपमलपनोपरि परिणतमदिरायतेऽधरस्तन्व्याः ॥ ८० ॥

कुसुमे पल्लवमस्मिन् कुसुममहो पल्लवे तत्र ।
इत्यादि वीक्ष्यमाणे मय्यनवस्थाभवच्चित्रम् ॥ ८१ ॥

क्षीराब्धेरमृतं ततोऽप्यमृतभूस्तस्मान्मुखं निर्मितं
तत्रालोक्य विधिस्तवाधरदलं सिद्धाभिलाषोऽभवत् ।
नासां मन्थमथारविन्दनयने नेत्रं भ्रमद्भ्रूलतां
चक्रे श्लाघ्यतरं ततःप्रभृति तन्निर्माणचातुर्यकम् ॥ ८२ ॥

भाविन्यप्यनुभावाद् भावित ऋषयस्तवाधरेऽलुभ्यन् ।
अत एव स्मितनयने स्त्रीमुखमेते सदा शुचि प्रोचुः ॥ ८३ ॥

आस्यगतमन्तिकगतं रक्तिमगतमेकभावगतम् ।
तदपि न मानसमयते दयिताधरतेजसो मुक्तिम् ॥ ८४ ॥

यदि भजति निजाश्रयानुभावाद् रसरुचिमार्दवमेतदीयमेव ।
त्रिजगति दयिताधरस्य साम्यं कलयतु कल्पतरोर्दलं तदानीम् ॥ ८५ ॥

सुमुखि तवाधरसविधे चुम्बनयोग्या कपोलपालीयम् ।
पाटीरद्रुमपार्श्वे नान्ये तरवः किमामसौरभ्याः ॥ ८६ ॥

दयिताधरस्य महिमा न कथं महीयमानः स्यात् ।
यस्य सुधापि सुरालयमण्डनमालम्बते दास्यम् ॥ ८७ ॥

---

1. B. सुमुखि.
2. B. चिन्त्यमाने.

सज्जनयोरिव सङ्गो मामकहृदयप्रियाधरयोः ।
इतरेतरं यदेते ह्यधिकाधिकरक्ततां भजतः ॥ ८८ ॥

इदमिव मधुरा चेन्निर्मितेयं सुधा स्यात्
किसलयसकलश्रीसङ्गिनी चेत् ततः स्यात् ।
मम नयनपथेन स्वीकृता चेदथ स्यात्
तदधरदलसाम्यं दत्तमस्यै तदा स्यात् ॥ ८९ ॥

यादृङ् मम श्रवणवर्त्मनि वर्तमान-
मास्वाद्यमानमपि तादृशमेव चेत् स्यात् ।
पीयूषमिन्दुमुखि ते रदनच्छदस्य
साम्यं समेतु सुरतावसरं विहाय ॥ ९० ॥

सुतनु तवाधररत्ने काचन नव्येव रीतिराभाति ।
यदिदं सुधेव मधुरं कोमलमेतच्छिरीषमिव ॥ ९१ ॥

अधरदलं तव सुन्दरि मङ्गलमेकं विनिश्चितं लोके ।
यत्साम्यादपि मणयो मङ्गलवस्तुत्वमापन्नाः ॥ ९२ ॥

अधरं विधाय सुदृशः शिथिलसमाधिर्विधिर्जातः ।
क्रोधादिव विदधे किं तदनु तदीयां तथाविधामभिधाम् ॥ ९३ ॥

नासाभूषणपद्मरागरुचयो वैमुख्यमातन्वते
संध्यासंगतसोमकान्तिसमतामाप्नोति दन्तद्युतिः ।
आ यान्पातुमनाः प्रयाति मधुपो रूपं स्वनामोचितं
यत्संगाद् विलसत्यसौ सुमुखि ते बिम्बाधरे शोणिमा ॥ ९४ ॥

सर्वोत्तमं तदधरं सृष्ट्वा स्वयमेव संसक्तः ।
वञ्चयितुं जनमीदृङ्नाम विरञ्चिः प्रपञ्चयांचक्रे ॥ ९५ ॥

इक्षोर्मृगाक्षि मन्ये धिक्कृतमधरेण माधुर्यम् ।
यदि वितथं कथमेष ग्रन्थिलभावं विभावयत्यन्तः ॥ ९६ ॥

किन्नरकण्ठि मृदुतरमतिमधुरं प्रस्फुरद्रागम् ।
अधरदलं भवदीयं गीतमिव प्रीतिमातनुते ॥ ९७ ॥

नाहो शिरीषमिव कोमलकल्प एष
बन्धूकवन्न च विराजति शोणदेश्यः ।
केनाधरस्य सुदृशो हृदयंगमस्य
सादृश्यमाः किलसये विनिवेशयन्ति ॥ ९८ ॥

1. B. इक्षौ मृगाक्षि.

धर्मपथप्रतिकूलं बिम्बाधरमम्बुजाक्षि तव ज्ञाने
यदितः पुराणफलानि द्विजः क्षतिं शीलयँल्लभते ॥ ९९ ॥

चञ्चलदृगञ्चालायाश्चञ्चति चित्रा रदच्छदच्छाया ।
योमध्यास्य मदीयं मानसमुत्तापमावहति ॥ १०० ॥

मामकमानसवित्तं चपलदृशश्चोरयत्यधर ।
यामः पश्यत पन्थाः काममहीशो हिनस्ति मामेव ॥ १०१ ॥

रदवाससि रममाणैस्त्रिजगति रत्नं तदेव निरधारि ।
क्लिश्यन्त्यहह विदग्धा रत्नाकररत्नसानुनामर्थे ॥ १०२ ॥

मन्ये समस्तमहिलामण्डनमेषा न चेदेवम ।
अस्यामधरोपधिना रत्नं कथमन्यथा जटितम् ॥ १०३ ॥

अधरदलं तव सुन्दरि मधुरस्मितमेदुरं जयति ।
अमृतं धवलमिदं नः प्रत्यायितुं प्रवृत्तमिव ॥ १०४ ॥

अतिकौतुकं त्वदीये सुन्दरि सौन्दर्यसागरे मज्जत् ।
अधरतरङ्गं धृत्वा मम मानसमीहते समुत्तर्तुम् ॥ १०५ ॥

भुजङ्गैः किं जुष्टः किमु दितिसुतै रत्नपदवीं
निजां नीतः किं वा विषमविषबन्धुत्वमयते ।
मृगाङ्के किं सङ्गं भजति वदति प्राज्ञपरिष-
त्सजानीमः केनाधरममृततुल्यं मृगदृशः ॥ १०६ ॥

ओष्ठे दत्ते निजरुचिमतिं स्थानमास्योपरिष्टाद्
आधत्ते मां तदिदमुभयं तन्वि दुःखाकरोति ।
रत्नेनालं तदितरमणिर्नासिकाभूषणे ऽस्तु
स्रष्टुस्तस्मादरुणिमकरी निर्मितिः कीर्तिमेतु ॥ १०७ ॥

ज्वलति वियोगहुताशे परितो दयिताधरस्मरणात् ।
अतिकौतुकं यदेतत् पल्लवितं विश्वमाभाति ॥ १०८ ॥

पीयूषे पीयमाने कथमपि विरतिं नैति पानाभिलाषः
सत्या लोकोक्तिरेषा यदि भवति तदा सर्वथासौ तदैव ।
धत्ते यद्यन्यथात्वं कमलदलकलागर्वसर्वंकषाक्षि
त्यक्ताशङ्कं तदा ते तदधिकतमतां याति बिम्बाधरोष्ठः ॥ १०९ ॥

---

1. B यन्मध्ये हि मदीयं.

निरन्तरं तन्वि यदाश्रयेण प्रयाति बिम्बं किल शोणिमानम् ।
तेन त्वदोष्ठेन समानमेतद् वदन्ति ये धिक्कृतिमेतदीयाम् ॥ ११० ॥

रदवसनं कौसुम्भं कीदृशमस्या यथा यथा यत्र ।
परिपतति स्मितममृतं तथा तथा वर्धते रागः ॥ १११ ॥

आलिङ्गितश्रीर्जनकः स्मरस्य
मुक्ताश्रितज्योतिरुपात्तलेखः ।
रागं दधानः शुचिषु द्विजेषु
युक्तं यदोष्ठः प्रतिभाति विष्णुः ॥ ११२ ॥

उपमानवस्तुजातं विजितं दयिताधरेण जानीमः ।
येनास्योपरि पतति प्रसूनवृष्टिः स्मितव्याजात् ॥ ११३ ॥

कान्ताधरविषयोऽपि प्रायो नायं परिश्रमो व्यर्थः ।
सुन्दरवस्तुनि यस्मादास्तेऽधिकमैश्वरं तेजः ॥ ११४ ॥

रसिकानामाद्यपदं किं च कवीनां य एक आरूढः ।
मन्ये मनसि विधास्यति मत्कृतिरेषा चमत्कृतिं तस्य ॥ ११५ ॥

यद्यपि खलबहुलोर्वी न वृथा क्लेशस्तदप्येषः ।
तुष्यतु तदेव तेजो विलसति यस्य प्रसादोऽयम् ॥ ११६ ॥

शुक्लेजनार्दनपुत्रो वत्साचार्यस्य दौहित्रः ।
पठितालंकृतिशास्त्रो भट्टश्रीमण्डनच्छात्रः ॥ ११७ ॥

हीराभिधानपितिव्रतमहसि प्राप्तनिजजन्मा ।
कविनीलकण्ठशर्मा निर्मितिमेनां विनिर्ममे शैवः ॥ ११८ ॥

इति शुक्लनीलकण्ठकविकल्पितमधरशतकम् ।

1-2. These stanzas are omitted in the C (Calcutta) Ms.

3. B. इति श्रीकविनीलकण्ठविरचितमधरशतकम् ॥
संवत् १७३० फाल्गुनशुक्लपंचम्यामलेखि शिवानंदेन ॥

श्लोक सूची

अज्ञात्वा कविताया: ... ८
अतिकौतुकं त्वदीये ... १०५
अधर: सुमुखि भवत्या: ... ६६
अधरदलं तव सुन्दरि मङ्गल° ... ९२
अधरदलं तव सुन्दरि मधुर° ... १०४
अधरदलं मतिमद्भि: ... ७९
अधरं विधाय सुहृश: ... ९३
अधरस्पर्धासमये ... ७५
अनवरतजायमाना निरवधि° ... ३
अमृतादधरोऽतिरिच्यते ... ३६
अरविन्दलोचनाया जयतो ... १४
अरुणकिरणशालीमानसो° ... ६७
अर्चयति स्मितकुसुमै: ... ४६
अवगतमतिशयसीमा ... ६४
अस्तोदयाद्रिशिखरोपरि ... ५२

आतङ्ककृद्विद्रुमवीथिकासु ... ४९
आदर्शमुख्या जगतीतलेऽस्मिन् ... ६१
आलिङ्गितश्रीर्जनक: स्मरस्य ... ११२
आसक्तानि यदस्मिन ... ४२
आस्यगतमन्तिकगतं ... ८४
आस्यं विकस्वरसरोरुह० ... २६

इक्षोर्मृगाक्षि मन्ये ... ९६
इक्षौ मृगाक्षि मन्ये ... ९६
इदमिव मधुरा चेन्निर्मितेयं ... ८९
इह युवहृदयानां खेलतां ... ७०

उपमानवस्तुजातं विजितं ... ११३

ओष्ठद्वयीमधुमदारुणिता° ... ३५
ओष्ठे दत्ते निजरुचिमति° ... १०७

कमलदलहृशोऽधरस्य ... ४३
करकं करोति भीत्या ... ६९
कर्कशतर्कविचारव्यग्र: ... ५
कस्याश्चिन्नवयसो ... ११
कान्ताधरविषयोऽपि प्राया ... ११४
कान्तोष्ठकान्ते: पुरतो ... ११
किञ्चिरकल्पि मृदुतर ... ११
किसलयफलमञ्जरी: ... ४१
किशलयफलमञ्जरी: ... ४१
कुसुमेपल्लवमस्मिन ... ८१
कोऽपि रस: कापि रुचि: ... ७४
क्लिश्यन्तु नाम शतश: ... १०
क्षीराब्धेरमृतं ततो ... ८२

गर्जन्तो जडरूपा: केचन ... ९
गिरां देव्या मन्ये ... ५१
गिरिशमृगदृशो यच्चुम्बनादेव ... २

चञ्चलदृगञ्चलायाश्चञ्चति ... १०२

जन्म त्वन्मुखपद्मात् ... ६२
जल्पन्त्वन्यस्तननिदप्रभृति° ... १०
जानीम: स्मितकीर्तिसूचित° ... २८
जीवातुरत्ययजुषोऽप्यमृत ... ३१
ज्वलति वियोगहुताशे ... १०८

त्रास: प्रवालस्य भवत्यमीक्ष्ण ... ३७
त्वधरबिम्बाद्रीतिं मधुरिम° ... ४७
त्वधरविधये विधिना ... ६५

दयिताधरस्य महिमा न कथ ... ८७
दशनवसनमेतद् दाडिमस्य ... ३८
दानैकशालिनि विशाल° ... ११
धर्मपथप्रतिकूलं बिम्बाधर° ... ९९

न पद्मरागोऽपि न पल्लवोऽपि ... ७३
न बन्धूकं नो वा करक° ... ४०
न यत्र लब्धो दशनच्छदो ... ४४
न यत्रालङ्कारो रचयति रुचिं ... ५२
नामक्षराणि दशनच्छद° ... ३८

नासाभूषणपद्मरागरुचयो ... ९४
नासामौक्तिकवेषो धयति ... १३
नाहो शिरीषमिव कोमलं ... ९८
निःसारमेवाधरपल्लवेन ... २०
नितान्तरक्तानि मनांसि ... ३३
निरन्तरं तन्वि यदाश्रयेण ...११०
नूनं मदनगणेशस्त्वदधरं ... ६८

पीयूषे पीयमाने कथमपि ...१०९
प्रफुल्लपङ्केरुहलोचनायाः ... २९
प्रातः पल्लवपङ्क्तिर्हिमं ... ४८

बद्धाञ्जलि विदुषोऽहं ... ६
बन्धूकं करकं जपा ... ७८
बन्धूकलक्ष्मीः कमलेक्षणायाः ... १८
बिम्बाधरं वीक्ष्य विलासं ... ५७
बुद्धिगुणाञ्चितमानसं ... ९

भवभालानलदग्धः ... १५
भाविन्यप्यनुभावाद्भावितं ... ८३
भुजंगैः किं जुष्टः किमदिति ...१०६

मत्पल्लवानां तुलनां वदन्ति ... ४५
मधुकरवन्मधुरगिरा सुमनं ... ८
मन्ये समस्तमहिलां ...१०३
माधुर्यमेतादृशमाप्तुकामा ... ६०
मामकमानसवित्तं ...१०१
मुखकोकनदे मदालसायाः ... २७
मुखमधरद्युतिमधुरं ... ६३
मोहे हेममयं विभाति ... ७१

यत्संगतो वचनमञ्चितं ... ३०
यदि भजति निजाश्रयां ... ८५
यदुपरचितचित्तां ... ५३
यद्यपि खलबहुलोर्वी ...११६
यादृङ् मम श्रवणवर्त्मनि ... ९०
यावकमृगशावदृशः ... २५

रक्तं किमित्यमृत देवतसेवने ... ५१
रक्तोऽधरः कीदृगहं न जाने ... ७२
रदवसनं कौसुम्भ ...१११
रदवाससि रममाणाः ...१०२
रसिकानामग्र्यपदं किं च ...११५
राग तनोति तनुते मोहं ... ८०

लावण्यामृतसागरे मृगदृशो ... १६

वदनकमलमुद्यन्मन्दहासं ... १
वसतिरनावृतदेशे जलमेकं ... ७६
विकसत्सरोजदलदीर्घदृशो ... २४
विधाय बिम्बाधरमायताक्ष्याः ... ५०
विलुम्पन्ती सुभ्रूदशन ... २३

शुक्लजनार्दनपुत्रः ...११७

सक्तं कृष्णेन रक्तं भवति ... ३४
सज्जनयोरिव संगो ... ८८
संध्यारागानुरक्तामृतं ... ७७
सपदि हरति बुद्धिं बिम्बं ... ३९
सरस्वतीनीरकृताभिषेकः ... ५६
सर्वोत्तमं तदधरं दृष्ट्वा ... ९५
सीत्कारसंभावितमोष्ठं ... ५५
सुतनु तवाधररत्ने ... ९१
सुधाभानोर्भानूननवरतं ... ५४
सुधा मुधैव प्रतिभाति ... २२
सुमुखि तवाधरसविधे ... ८६
सुरतरुसहजन्मताकृतं ... २१

हीराभिधानपातिव्रतमहसि ...११८

वृत्त-सूची

आर्या– ४, ७, ८, ११, १३, १४, १५, ४७, ६३, ६८, ९१, ९२, ९९, १००, १११, ११३, ११४.

इन्द्रवज्रा– २०, ११२.

उद्गीति– ६९, ८०, ९३, ९५, ९६, १०१.

उपगीति– ३, ६, ९, २५, ४२, ४६, ४८, ६४, ६५, ६६, ७५, ७९, ८१, ८४, ८७, ८८, ९७, १०३, १०४, १०८, ११६, ११७.

उपजाति– १७, १८, २२, २९, ३३, ३७, ४४, ४५, ४९, ५०, ५५, ५६, ५७, ६०, ६१, ७२, ११०.

उपेन्द्रवज्रा– ७३.

औपच्छन्दसिक or पुष्पिताग्रा – २१, २७, ४१, ४३, ८५.

गीति– ५, १०, ६२, ७४, ७६, ८३, ८६, १०२, १०५, ११५, ११८.

पुष्पिताग्रा– see औपच्छन्दसिक.

प्रमिताक्षरा– २४.

मन्दाक्रान्ता– १०७.

मालिनी– १, २, ३८, ३९, ५३, ६७, ७०, ८९.

वसन्ततिलका– १९, २६, ३०, ३१, ३२, ३५, ५१, ५२, ९०, ९८.

वियोगिनी– ३६.

शार्दूलविक्रीडित– १६, २८, ७१, ७८, ८२, ९४.

शिखरिणी– २३, ४०, ५४, ५८, ५९, १०६.

स्रग्धरा– १२, ३४, ७७, १०९.